## कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूपण्यकम्बलो दासीभाराणां च । (४२/३७७६)

कुरुगार्हपत रिक्तगुरु असूतजरती अश्लीलदृढरूपा पारेवडवा तैतिलकद्रू पण्यकम्बल [1]इत्येते समासाः, तेषां दासीभारादीनां च पूर्वपदं प्रकृतिस्वरं भवति । कुरूणां गार्हपतं कुरुगार्हपतम् । 'कृग्रोरुच्च' (उ. २४) इति कुरुशब्दः कुप्रत्ययान्तोऽन्तोदात्तः ।

[७०७] कुरुवृज्योर्गार्हपत इति वक्तव्यम् । (म. भा. ३.१२६)

वृजीनां गार्हपतं वृजिगार्हपतम् । वृजिशब्द आद्युदात्तः ।

रिक्तो गुरुः [2]रिक्तगुरुः, रिक्तगुरुः । 'रिक्ते विभाषा' (६.१.२०८/३६९६) इति पूर्वपदमाद्युदात्तमन्तोदात्तं वा । असूता जरती असूतजरती । अश्लीला दृढरूपा [3]अश्लीलदृढरूपा । अश्लीलशब्दो नञ्समासत्वादाद्युदात्तः । श्रीः यस्यास्ति तत् श्लीलम् । सिध्मादेराकृतिगणत्वाल्लच् । कपिलकादित्वाच् च लत्वम् । अश्लीलदृढरूपा इति हि संस्थानमात्रेण शोभना निःश्रीका लावण्यविरहिता उच्यते । पारे वडवा इव पारेवडवा । [4]निपातनादिवार्थे समासो विभक्त्यलोपश्च । पारशब्दो घृतादित्वादन्तोदात्तः । [5]तैतिलानां कद्रूः तैतिलकद्रूः । तितिलिनोऽपत्यं छात्रो वा तैतिलः इत्यणन्तः । पण्यकम्बलः । पण्यशब्दो यदन्तत्वादाद्युदात्तः ।

[७०८] पण्यकम्बलः सञ्ज्ञायामिति वक्तव्यम् ।

अन्यत्र पणितव्ये कम्बले समासान्तोदात्तत्वमेव । प्रतिपदोक्ते हि कृत्यानां समासे द्वितीया कृत्या इत्येष [6]विहितः स्वरितः ।

दास्या भारः दासीभारः । देवहूतिः । देवजूतिः । देवसूतिः । देवनीतिः । [7]अन्तोदात्तं पूर्वपदम् । वसुनीतिः । वसुशब्दः आद्युदात्तः । शृस्वृस्निहित्रप्यसिवसि (उ. १०) इत्यत्र[8] 'धान्ये नित्' (उ. ९) इति वर्तते[9] । ओषधिः । ओषो धीयतेऽस्याम् इति 'कर्मण्यधिकरणे च' (३.३.९३/३२७१) इति किप्रत्ययः । ओषशब्दो घञन्तत्वादाद्युदात्तः । चन्द्रमाः । 'चन्द्रे मो डित्' (उ. ६७७) इति असिप्रत्ययान्तोऽयम् । चन्द्रशब्दस्तु रक्प्रत्ययान्तत्वादन्तोदात्तः । [10]यस्य तत्पुरुषस्य पूर्वपदप्रकृतिस्वरत्वमिष्यते, न च विहितं, स सर्वो दासीभारादिषु द्रष्टव्यः ॥

## चतुर्थी तदर्थे । (४३/३७७७)

चतुर्थ्यन्तं पूर्वपदं तदर्थे उत्तरपदे तदभिधेयार्थं यत् तद्वाचिन्युत्तरपदे [11]प्रकृतिस्वरं भवति । तत् इति चतुर्थ्यन्तस्यार्थः परामृश्यते । यूपदारु । कुण्डलहिरण्यम् । यूपशब्द आद्युदात्तः । 'कुसुयुभ्यश्च' (उ. ३१४) इत्यत्र नित् इति वर्तते । कुण्डलशब्दोऽपि 'वृषादिभ्यश्चित्' (उ. ११२) इति [12]कलप्रत्ययान्तोऽन्तोदात्तः ।

---

1. इत्येतेषां समासानाम् ह. 2. उदाहरणमिदं नास्ति फ. 3. अश्लीला दृढरूपा श्रीः यस्या इति इत्यधिकम् क. 4. निपातनादेव इत्यर्थो ड. 5. तैतिलादीनां क. ब. फ. 6. स्वरो विहितः क. 7. वाक्यमिदं नास्ति फ. 8. क्विः इत्यधिकम् ब. 9. देवनीतिः देवशब्दोऽन्तोदात्तः इत्यधिकम् क. 10. यद् विहितलक्षणपूर्वपदं तत्सर्वं दासीभारादिषु द्रष्टव्यम् ह. 11. परतः इत्यधिकम् ह. 12. कलप्रत्ययान्तः नास्ति फ.